# नेपाल सरकार
# शिक्षक सेवा आयोग
# निम्न माध्यमिक तहको खुला प्रतियोगितात्मक विषयगत परीक्षाको पाठ्यक्रम -२०७८

विषयः संस्कृतभाषा पूर्णाङ्क - १०० समयः - ३ घण्टा

खण्डः 'क'

१. आधारभूतस्तरस्य ६–८ कक्षाणां पाठ्यक्रमस्य पाठ्यपुस्तकस्य चाध्ययनम्

१.१. पाठ्यक्रमस्य परिचयः, तत्त्वानि

१.२. संस्कृतभाषायाः पाठ्यक्रमस्य परिचयः, विकासप्रक्रिया

१.३. संस्कृतभाषायाः पाठ्यक्रमपाठ्यपुस्तकयोः सम्बन्धः, प्रयोगविधिश्च

१.४. आदर्शपाठ्यपुस्तकस्य लक्षणम्, संस्कृतभाषापाठ्यपुस्तकस्य समीक्षणञ्च

१.५. राष्ट्रियपाठ्यक्रमप्रारूपम् – २०७६

१.६. संस्कृतभाषायाः पाठ्यक्रमेण परिकल्पिताः स्तरगतयोग्यताः, शिक्षणोपलब्धयश्च

१.७. संस्कृतभाषायाः पाठ्यक्रमस्य विषयक्षेत्राणि

२. भाषिकशिल्पशिक्षणम्

२.१. भाषिकशिल्पशिक्षणस्य परिचय आवश्यकता च

२.२. भाषिकशिल्पानां मिथः सम्बन्धः

२.३. श्रवण–भाषणशिल्पयोः सम्बन्धः, तत्प्रयोगविधिश्च

२.४. पठनशिल्पस्य परिचयः, महत्त्वम्, प्रकाराः, शिक्षणविधयः, प्रयोज्याः शिक्षणसामग्र्यश्च

२.५. लेखनशिल्पस्य परिचयः, महत्त्वम्, शिक्षणविधयः, प्रयोज्याः शिक्षणसामग्र्यश्च

२.६. भाषिकशिल्पानां शिक्षणस्य कार्यकलापाः

३. भाषातत्त्वानां सर्जनात्मकलेखनस्य शिक्षणम्

३.१. वर्णानां सङ्ख्या–भेद–स्थान–प्रयत्नानां शिक्षणम्

३.२. सन्धीनां स्वरूपं शिक्षणञ्च

३.३. संस्कृतभाषायाः ६–८ कक्षाणां पाठ्यक्रमेण निर्दिष्टै उपसर्गैः प्रत्ययैश्च निर्मितानां शब्दानां प्रयोगविधिशिक्षणम्

३.४. अव्ययपदानां वाक्ये प्रयोगविधिशिक्षणम्

३.५. लिङ्ग–वचन–पुरुष–काल–वाच्यानां प्रयोगविधिशिक्षणम्

३.६. आशीर्वादार्थ–विध्याद्यर्थ–प्रेरणार्थानां प्रयोगविधेः शिक्षणम्

३.७. कारक–विभक्तिप्रयोगविधेः शिक्षणम्

३.८. संस्कृतभाषायाः ६–८ कक्षाणां पाठ्यक्रमेण निर्धारितानां प्रातिपदिकानां धातूनाञ्च रूपावल्याः प्रयोगविधेः शिक्षणम्

३.९. संस्कृतभाषायाः ६–८ कक्षाणां पाठ्यक्रमेण निर्दिष्टशब्दभाण्डागारस्य प्रयोगविधेः शिक्षणम्

३.१०. सङ्ख्यावाचिशब्दानां प्रयोगविधिः

३.११. पठने लेखने च लेख्यचिह्नानां समुचितप्रयोगविधेः शिक्षणम्

३.१२. निर्दिष्टविधासु व्यावहारिकलेखनस्य सर्जनात्मकलेखनस्य च शिक्षणम्

४. विधाशिक्षणम्

४.१. भाषिकविधानां सप्रकारं परिचयः तत्शिक्षणस्य महत्त्वञ्च

४.२. गद्यविधाशिक्षणे कथा–प्रबन्ध–जीवनवृत्त–संवाद–पत्र–वक्तृता–वादविदादोपविधानां परिचयः, प्रकाराः, तत्शिक्षणप्रयोजनञ्च

४.३. पद्यविधाशिक्षणस्य परिचयः, प्रयोजनम्,

४.४. सन्दर्भलेखनपूर्वकं पदच्छेदान्वय–पर्याय–कोश–व्युत्पत्ति–सरलार्थ–भावार्थादिशिक्षणञ्च

४.५. विधाशिक्षणस्य प्रतिविधोपविधं कार्यकलापाः सामग्र्यश्च

४.६. संस्कृतभाषाशिक्षणे सन्दर्भसामग्रीणामुपयोगः

५. शिक्षणसहजीकरणं मूल्याङ्कनञ्च

५.१. संस्कृतभाषाशिक्षणस्य सहजीकरणोपायाः

५.२. संस्कृतभाषाशिक्षणे प्रयोज्या विधयः शिक्षणसामग्रश्च

५.३. संस्कृतभाषाशिक्षणे शिक्षणयोजनानां शिक्षणसामग्रीणां च निर्माणं प्रयोगश्च

५.४. कक्षाव्यवस्थापनम्

५.५. मूल्याङ्कनस्य परिचयः प्रकाराः प्रयोगश्च

५.६. परीक्षामूल्याङ्कनयोर्भेदः

५.७. विशिष्टीकरणसारिण्या निर्माणं प्रयोगश्च

५.८. प्रश्नपत्रस्योत्तरकुञ्जिकायाश्च निर्माणम्

५.९. परीक्षापरिणामस्य समीक्षणं पृष्ठपोषणञ्च

## खण्डः 'ख'

६. छन्दोऽलङ्काराध्ययनम्

६.१. पद्यलक्षणम्, जाति–वृत्ताख्ययोः पद्यभेदयोः परिचयः, सम–अर्धसम–विषमाख्यानां वृत्तभेदानां परिचयः,

६.२. ह्रस्वदीर्घवर्णाभिज्ञानम्, लघुगुरुपरिचयः, ह्रस्वानां गुरुभावावस्था, सभेदं गणपरिचयः, यतिपरिचयश्च

६.३. अनुष्टुप्, आर्या, शशिवदना, विद्युन्माला, प्रमाणिका, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, शालिनी, रथोद्धता, स्वागता, दोधकम्, इन्दिरा, वंशस्थः, भुजङ्गप्रयातम्, तोटकम्, स्रग्विणी, द्रुतविलम्बितम्, वसन्ततिलकम्, मालिनी, पञ्चचामरम्, शिखरिणी, पृथ्वी, मन्दाक्रान्ता, हरिणी, शार्दूलविक्रीडितम्, स्रग्धरा इत्येषां छन्दसां ससमन्वयं लक्षणोदाहरणाध्ययनम्

६.४. अलङ्कारस्वरूपम्, काव्येऽलङ्कारमहत्त्वं च

६.५. सपरिचयमलङ्कारभेदाः

६.६. अनुप्रासः, यमकम्, स्वभावोक्तिः, उपमा, मालोपमा, रूपकम्, उत्प्रेक्षा, अतिशयोक्तिः, व्यतिरेकः, अर्थान्तरन्यासः, निदर्शना, दृष्टान्तः, तुल्ययोगिता,

दीपकम्, अपह्नुतिः, समासोक्तिः, काव्यलिङ्गम्, विशेषोक्तिः, विरोधः इत्येषामलङ्काराणां तत्त्वविमर्शनपूर्वकं लक्षणोदाहरणानि

७. भाषिकविषयाध्ययनम्

७.१. गुरुशिष्यसम्बन्धविषये, परोपकारविषये, नीतिशिक्षाया विषये, राष्ट्रगौरवविषये, चरित्रनिर्माणविषये, एकताया विषये, पौरस्त्यवाङ्मयानां महत्त्वविषये, प्रकृतिसंरक्षणविषये, अन्येषु सामयिकविषयेषु वा लघुप्रबन्धस्य अनुच्छेदस्य वा लेखनाभ्यासः

७.२. निर्दिष्टविषयेषु पत्र–दैनिकी–मनोवाद–वक्तृता–वादविवाद–संवाद–प्रतिवेदन–घटनावर्णनादिलेखनाभ्यासः

७.३. निर्दिष्टलिङ्ग–वचन–पुरुष–काल–वाच्यार्थादीनामाधारेण निर्दिष्टविषयाणां वर्णनम्,

७.४. निर्दिष्टकारक–विभक्ति–लिङ्ग–वचन–पुरुष–काल–वाच्यार्थादीनां निर्देशानुसारेण वाक्यपरिवर्तनम्,

७.५. प्रदत्तानां वाक्यानां प्रदत्तस्यानुच्छेदस्य वा संस्कृतेऽनुवादश्च

८. व्याकरणाध्ययनम्

८.१. प्रत्याहारनिर्माणप्रक्रिया, स्वरवर्णानामष्टादशादिभेदज्ञानम्, वर्णोच्चारणस्थानप्रयत्नाः, इत्–लोप–प्रत्याहार–ह्रस्व–दीर्घ–प्लुतोदात्तानुदात्त–स्वरितानुनासिक–सवर्ण–संहिता–संयोग–पदसंज्ञानां ससूत्रं सोदाहरणं परिचयश्च

८.२. अच्सन्धिषु यण्–अयादि–गुण–वृद्धि–दीर्घ–पूर्वरूप–पररूप–प्रकृतिभावसन्धीनां हल्सन्धिषु श्चुत्व–ष्टुत्व–जश्त्व–अनुनासिक–चत्र्व–अनुस्वार–परसवर्ण–छत्व–तुगागम–धुडागम–रुत्वसन्धीनां विसर्गसन्धिषु सत्व–विसर्गत्व–रुत्व–उत्व–यत्व–रलोप–सुलोपसन्धीनाञ्च ससूत्रं सोदाहरणं च परिचयः

८.३. अजन्तपुंलिङ्गे राम–सर्व–पूर्व–स्व–अन्तर–निर्जर–विश्वपा–हरि–सखि–पति–कति–एक–द्वि–त्रि–क्रोष्टु–नृ–पितृ–धातृ–गो–रैशब्दानाम्, अजन्तस्त्रीलिङ्गे रमा– सर्वा–मति–गौरी–एक–द्वि–त्रि–स्त्री–श्री–स्वसृशब्दानाम्,

अजन्तनपुंसकलिङ्गे ज्ञान–सर्व–कतर–वारि–दधि–मधुशब्दानाञ्च रूपावलिज्ञानम्

८.४. हलन्तपुंलिङ्गे लिह्–दुह्–द्रुह्–विश्ववाह्–चतुर्–अनडुह्–सुदिव्–किम्–इदम्–त्यद्– तद्–यद्–एतद्–अदस्–राजन्–यज्वन्–वृत्रहन्–मघवत्–श्वन्–युवन्–पथिन्– पञ्चन्–अष्टन्–ऋत्विज्–युष्मद्–अस्मद्– महत्–धीमत्–भवत्–तादृश–षष्– विद्वस्-शब्दानाम्, हलन्तस्त्रीलिङ्गे उपानह्–दिव्–गिर्–चतुर्–किम्–इदम्–त्यद्– तद्–यद्–एतद्–अदस्–वाच्–दिश्–अप्–शब्दानाम्, हलन्तनपुंसकलिङ्गे स्वनडुह्–किम्–इदम्–त्यद्–तद्–यद्–एतद्–अदस्–अहन्–पचत्–धनुष्–शब्दानां रूपावलिज्ञानम्

८.५. मध्यसिद्धान्तकौमुद्या अव्ययप्रकरणे प्रदत्तानामव्ययानामर्थबोधपुरःसरं वाक्यप्रयोगाभ्यासः

८.६. भ्वादिप्रकरणे भू–अत–षिध–गद–णद–टुनदि–अर्च–व्रज–कटे–गुपू–क्षि–क्रमु–पा–ग्लै–ह्वृ–श्रु–गम्लृ–एध–कमु–वृतु–त्रपूष्–श्रिञ्–भृञ्–णीञ्–डुपचष्–भज–यज–वहधातूनाम्, अदादिप्रकरणे अद–हन–यु–या–विद–अस–इण्–इङ्–दुह–ब्रूञ्धातूनाम्, जुहोत्यादिप्रकरणे हु–ञिभी–ओहाक्–डुदाञ्–डुधाञ्धातूनाम्, दिवादिप्रकरणे दिवु–नृती–णश–जनी–बुधधातूनाम्, स्वादिप्रकरणे षुञ्–चिञ्–धूञ्धातूनाम्, तुदादिप्रकरणे तुद–षिच–लिप–इषु–षद्लृ–प्रच्छधातूनाम्, रुधादिप्रकरणे रुधिर्–युजिर्–भुजधातूनाम्, तनादिप्रकरणे तनु–डुकृञ्–मनुधातूनाम्, क्र्यादिप्रकरणे डुक्रीञ्–ग्रह–ज्ञाधातूनाम्, चुरादिप्रकरणे च चुर–कथ–गणधातूनाञ्च रूपावलिज्ञानम्

८.७. भू–पठ–गम्लृ–डुकृञ्धातूनाम् ण्यन्ते, सन्नन्ते, यङन्ते, यङ्लुगन्ते च रूपावलिज्ञानम्

८.८. भूधातोर्भावे, पठधातोः कर्मणि लकारेषु जायमानानां रूपाणां ज्ञानम्

८.९. लकाराणामर्थज्ञानम्

८.१०. कृत्यसंज्ञकेषु प्रमुखधातुभ्यः तव्यत्–अनीयर्–यत्–ण्यत्–क्यप्प्रत्ययविधानेन निष्पन्नानां शब्दानां सार्थं प्रयोगज्ञानम्

८.११. कृत्सु ण्वुल्–तृच्–क–अण्–ट–खश्–क्विप्–क्वनिप्–ड–क्त–क्तवतु–शतृ–शानच्–ष्ट्रन्–इत्र–तुमुन्–घञ्–अच्–अप्–नङ्–कि–क्तिन्–अ–ल्युट्–खल्–क्त्वा–ल्यप्–णमुल्प्रत्ययानां विधानेन शब्दानां प्रयोगज्ञानम्

८.१२. समासपरिचयः, समासप्रकाराः, उपप्रकाराः प्रकाराणाम्, पप्रकाराणाञ्च उदाहरणानि, तत्प्रयोगश्च

८.१३. तद्धितेषु अपत्येऽर्थे अण्–ण्य–यञ्–फक्–इञ्–ढक्–यत्–घ–ठक्प्रत्ययैः, रक्ताद्यर्थेषु अण्–ड्य–ट्यण्–तल्–ठक्–वुन्प्रत्ययैः, चातुरर्थिके अण्–ड्मतुप्–वलच्प्रत्ययैः, शैषिके अण्–घ–ख–य–खञ्–ढक्–त्यक्–यत्–त्यप्–छ–ठञ्–मयट्प्रत्ययैः, विकारार्थे अण्–मयट्–यत्प्रत्ययैः, ठगधिकारे ठक्प्रत्ययेन, यदधिकारे यत्–यप्रत्ययाभ्याम्, छयतोरधिकारे छ–यत्प्रत्ययाभ्याम्, ठञधिकारे ठञ्–अण्–अञ्–यत्प्रत्ययैः, त्वतलोरधिकारे वति–त्वल्–तल्–इमनिच्–अण्–ष्यञ्–य–ढक्–यक्प्रत्ययैः, भवनाद्यर्थे खञ्–ढक्–इतच्–द्वयसच्–दध्नच्–मात्रच्–वतुप्–तयप्–डट्प्रत्ययैः, मत्वर्थीये मतुप्–लच्–श–न–इलच्–उरच्–व–इनि–ठन्–विनि–ग्मिनि–अच्–युस्प्रत्ययैः, प्राग्दिशीये तसिल्–त्रल्–दा–र्हिल्–थाल्–थमुप्रत्ययैः, प्रागिवीये तमप्–इष्ठन्–तरप्–ईयसुन्–कल्पप्–देश्य–देशीयर्–क–डतरच्–डतमच्प्रत्ययैः, स्वार्थिके कन्–मयट्–अण्–शस्–च्वि–डाच्प्रत्ययैः निष्पन्नानां पदानां सार्थबोधं प्रयोगः

८.१४. स्त्रीप्रत्ययेषु टाप्–ङीप्–ङीष्–ऊङ्–ङीन्–तिप्रत्ययैः निष्पन्नानां शब्दानां अर्थबोधेन प्रयोगः

९. संस्कृतवाङ्मयस्य सङ्क्षिप्तः परिचयः

९.१. वेदपरिचयः, संहिता–ब्राह्मण–आरण्यक–उपनिषदां परिचयश्च

९.२. चतुर्णां वेदानां चतुर्णामुपवेदानाञ्च पृथक् पृथक् परिचयः

९.३. आयुर्वेदस्य अष्टाङ्गानां परिचयः

९.४. वेदस्य षडङ्गानां पृथक् पृथक् परिचयः

९.५. धर्मशास्त्रस्य पुराणानां च परिचयः

९.६. षण्णाम् आस्तिकदर्शनानां त्रयाणां नास्तिकदर्शनानां च पृथक् पृथक् परिचयः

१०. काव्यशास्त्राध्ययनम्

१०.१. काव्यलक्षणम्, काव्यप्रयोजनम्, काव्यहेतुश्च

१०.२. शक्तिग्रहोपायाः

१०.३. शब्दशक्तिपरिचयस्तत्प्रकाराश्च

१०.४. सोदाहरणं काव्यभेदाः

१०.५. सोदाहरणं काव्यदोषाः, काव्यगुणाः, काव्यरीतयश्च

१०.६. रसपरिचयः, रसतत्त्वानि, रसभेदाश्च

## विशिष्टीकरणसारिणी

संस्कृतभाषा स्तरः निम्नमाध्यमिकः

| क्र.सं. | विषयक्षेत्रम् | प्रश्नसङ्ख्या | प्रतिप्रश्नमङ्काः | अङ्काः |
|---|---|---|---|---|
| | खण्डः क | | | |
| १ | आधारभूतस्तरस्य ६–८ कक्षाणां पाठ्यक्रमस्य पाठ्यपुस्तकस्य चाध्ययनम् | १ | १० | १० |
| २. | भाषिकशिल्पशिक्षणम् | १ | १० | १० |
| ३. | भाषातत्त्वानां सर्जनात्मकलेखनस्य शिक्षणम् | १ | १० | १० |
| ४. | विधाशिक्षणम् | १ | १० | १० |
| ५. | शिक्षणसहजीकरणं मूल्याङ्कनञ्च | १ | १० | १० |
| | खण्डः ख | | | |
| ६. | छन्दोऽलङ्काराध्ययनम् | १ | १० | १० |
| ७. | भाषिकविषयाध्ययनम् | १ | १० | १० |
| ८. | व्याकरणाध्ययनम् | १ | १० | १० |
| ९. | संस्कृतवाङ्मयस्य सङ्क्षिप्तः परिचयः | १ | १० | १० |
| १०. | काव्यशास्त्राध्ययनम् | १ | १० | १० |
| **योगः** | | १० | | १०० |

द्रष्टव्यविषयाः

१. पाठ्यक्रमः ‘खण्डः क’ ‘खण्डः ख’ इति खण्डद्वये विभक्तो वर्तते।

२. ‘खण्डः क’ इत्यस्मात् प्रष्टव्याः प्रश्नाः शिक्षणप्रक्रियासम्बद्धा भवन्ति।

३. ‘खण्डः ख’ इत्यतः प्रष्टव्याः प्रश्नाः संज्ञानात्मका भवन्ति।

४. प्रतिखण्डं भिन्ने उत्तरपुस्तिके दीयेते।

५. लिखितपरीक्षाया माध्यमभाषा संस्कृतमेव भवति।

६. पाठ्यक्रमोऽयं २०७८।०५।२३ दिनाङ्काद् आरप्स्यते।